# U.G. 1st Semester Examination - 2025

# SANSKRIT

## [MAJOR]

## Course Code : SANS-MJ-T-01

## [NEP-2020]

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. यथेच्छं **दशानां** प्रश्नानामुत्तराणि सुरलसुरगिरा देवनागरीलिपिञ्चाश्रित्य प्रदेयानि: 2×10=20

क) 'रघुवंशम्' कस्य कृतिरस्ति? अस्मिन् महाकाव्ये कति सर्गाः समुपलभ्यन्ते?

ख) "राजेन्दुरिन्दु: क्षीरनिधाविव" — क आसीत् 'राजेन्दु:'? 'क्षीरनिधाविव' पदस्य सन्धिविच्छेद: कार्य:।

ग) राजा दिलीप: कस्मात् कारणात् प्रजाभ्यो वलिम् अग्रहीत्? इदं कर्म केन सह तुलितमस्ति?

घ) राज्ञो दिलीपस्य पत्नी कस्मिन् वंशे सम्भूता आसीत्? सपत्नी राजा दिलीप: पुत्रकाम्यया कुत्र जगाम?

ङ) "धुर्यान् विश्रामय" — क: कदा कं प्रति आदेशमिमं चकार?

च) राज्ञो वशिष्ठस्य पत्नी का आसीत्? सपत्नीवशिष्ठं पश्यन् दिलीप: किमनुभूतवान्?

छ) "इक्ष्वा कूणां दुरापेऽर्थे त्वदधीना हि सिद्धय:" — वचनस्य सारो लेख्य:।

*[Turn over]*

ज) युधिष्ठिरं प्रति दुर्योधनवातप्रिषणावसरे वनेचरस्य वाग्भङ्गी कीदृशी आसीत्?

झ) ''तथापि जिह्म: स भवज्जिगीषया'' — 'जिह्म'-पदस्य कोऽर्थ:? 'स'-पदेन को बोध्य:?

ञ) दुर्योधन: कथं सामदाननीतिं प्रयुक्तवान्?

ट) परराज्यनीतिविषये दुर्योधनस्य उद्योग: कथमासीत्?

ठ) ''विचित्ररूपा: खलु चित्रवृत्तय:'' — पादस्य तात्पर्यार्थो लेख्य:।

ड) ''विहाय शान्तिं नृप! धाम तत् पुन:'' — कस्य उक्ति:? उक्तिरियं किमर्थम्?

ढ) वनेचरमतेन कस्तावत् किंसखा कश्च किम्प्रभु:?

2. यथेच्छं **चतुर्णा** प्रश्नानामुत्तराणि संस्कृतभाषयां वङ्गभाषायाम् आङ्गलभाषायां वा लेख्यानि:

5×4=20

क) यस्य कस्यचि**देकस्य** श्लोकस्य बङ्गानुवाद: आङ्गलानुवाद: वा क्रियताम्-

i) तं वेधा विदधे नूनं महाभूतसमाधिना।
तथाहि सर्वे तस्यासन् परार्थैकफला गुणा:।।

ii) तस्यामात्मानुरूपायामात्मजन्मसमुत्सुक:।
विलम्बितफलै: कालं स निनाय मनोरथै:।।

ख) संक्षिप्तात्मिका टीका रचनीया (**द्वयस्य**) : $2\frac{1}{2}+2\frac{1}{2}$

i) सुरभि:

ii) वशिष्ठाश्रमस्य शोभा

iii) अरिषड्वर्ग:

iv) चारचक्षुष:



ग) यस्य कस्यचि**देकस्य** श्लोकस्य वङ्गानुवाद आङ्गलानुवादो वा करणीय:

i) सुखेन लभ्या दधत: कृषीवलैरकृष्टपच्या इव शस्यसम्पद:।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति।।

ii) व्रजन्ति ते मूढधिय: पराभवं भवन्ति मायाविषु ये न मायिन:।
प्रविश्य हि घ्नन्ति शठास्तथाविधान् असंवृताङ्गान् निशिता इवेषव:।।

घ) यथामति भावार्थं प्रकाशय (**एकस्य**):

i) हेम्न: संलक्ष्यने ह्यग्नौ विशुद्धि:श्यामिकापि वा।

ii) हितं मनोहारि च दूर्लभंक्च:।।

ङ) संक्षिप्तात्मिकां टीकां लिखतु (**एकस्य**) :

i) अश्वघोष: ii) माघ:

च) संक्षिप्तात्मिकां टीकां लिखतु (**एकस्य**) :

i) रघुवंशम् ii) रावणवधम्

3. **द्वयो:** प्रश्नयोरुत्तराणि संस्कृतभाषया वङ्गभाषया आङ्गलभाषया वा प्रदेयानि:

10×2=20

क) दिलीपस्य पुत्रोत्पत्ते: प्रतिबन्धक: क:? अभिलाषसिद्धये वशिष्ठ: दिलीपं किमुपदिष्टवान् – रघुवंशस्य प्रथमसर्गानुसारत: तदालोचय।

ख) ''नारिकेलफलसम्मितं वच: भारवे: सपदि तद्विभज्यते।'' — किरातार्जुनीयस्य प्रथमसर्गमनुसृत्य वचनस्य सार्थकता प्रतिपाद्यताम्।

ग) उत्संस्थलनिर्देशपुर:सरं यस्य कस्यचि**देकस्य** श्लोकस्य संस्कृतभाषया सप्रसंङ्गव्याख्या कार्या।

i) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्यय:।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।

ii) अबन्धकोपस्य विहन्तुरापदां भवन्ति वश्या: स्वयमेव देहिन:।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादर:।।

घ) प्राचीनसंस्कृतमहाकाव्यस्य इतिहासे श्रीहर्षस्य साहित्यकीर्तिमाश्रित्य कश्चन प्रबन्धो लेख्य:।